क्रम सं०

विषय: धर्मशास्त्रीय

प्रवेश सं०

ग्रन्थकार ×

नाम त्रिंशत् श्लोकी व्याख्या "(श्रीमन्महाचार्यकृतम्)"

पत्र सं० १-२१ "आरंभम्" अक्षर सं० (पंक्तौ) ४१ पंक्ति सं० (पृष्ठे) १४

श्लोक सं०

लिपि: दे.ना. आधार: का.

आकार: ए.७.x४.६.

वि० विवरणम् पू.

अ. ८१६६

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५० ०००

13888

Indira Gandhi National Centre for the Arts

॥श्रीत्रिंशच्छ्लोकिआरम्भप्रारंभः॥

Indira Gandhi National Centre for the Arts

श्रीगणेशायनमः॥ नत्वा सरस्वतीं देवीं गणेशं गुरुमात्मनः। आशौचसंग्रहं त्रिंशच्छ्लोक्या व्याख्यां करोम्यहं। तत्रस्मा ==रेषु
र्त्तक्रमं समुल्लंघ्य लोकप्रसिद्धक्रममनुसरन् गर्भविपत्तिनिमित्ताशौचं क्रमेणाशौचं प्रतिपादयति। तत्राशौ
१ चं नाम पुरुषनिष्ठः कालः स्नानाद्यपनोद्यः कश्चिदभावरूपो धर्मः॥ ॥षण्मासाभ्यंतराले स्वपुरुषनिहिते
गर्भमात्रे विनष्टे माता तन्मास संख्या समदिनमशुचिः स्नानशुद्धाः सपिंडाः। अंसे मासद्वये तु त्रिदिनमशु
चयोऽतः परं सूतिवत् स्यात् चातुर्वर्ण्यस्य तुल्यं भवति वयसि यस्त्रोच्यते शौचमात्रं॥१॥ अस्यायमन्वयः
षण्मासाभ्यंतरेषु षण्णां मासानामभ्यंतराणि मध्यानि तेषु स्वपुरुषनिहिते स्वभर्तृनिहिते गर्भमात्रे अ
पूर्णावयवे गर्भे विनष्टे च्युते माता जननी तन्मास संख्या समदिनं। तेषां मासानां गर्भधारणादारभ्य प्रत्येकं
याया संख्या तया समानि दिनानि यत्र तद्यथा भवति तथाऽशुचिरशुद्धा स्यात्। अत्र सच्चासौ मासश्च तन्मा
सः तस्य संख्या तया समानि दिनानि यस्मिन्निति समासः। तथा चायमर्थः। गर्भधारणमासमादिं कृत्वा
यन्मासाभ्यंतरे गर्भो नष्टः तन्मास संख्या समानि दिनानीति। अत्र यद्यप्यविशेषेणोक्तं तथापि च
तुर्थमासमारभ्य षण्मासपर्यंतं द्रष्टव्यं। आद्ये मासत्रये च विशेषेण त्रिरात्रमेव मातुराशौचं सपिंडानां तु
स्नानमात्रेणाशौचं। तथा च मरीचिः। गर्भस्रुतौ यथामासमचिरे तूत्तमे त्रयम् इति। अचिरे आद्यमासत्रये
उत्तमे ब्राह्मणजातौ त्रयो दिवसाः। तथा च स्मृ[त्यं]तरेऽपि। स्राव मातुस्त्रिरात्रं स्यात् सपिंडाशौचवर्जनमि १
ति। एवं मातुराशौचमभिधाय सपिंडानामाह। स्नानशुद्धाः सपिंडा इति। सपिंडाः स्नानेन शुद्धाः स्युरित्यर्थः।

सद्यः [शौ]चं सपिंडानां गर्भस्य पतने सतीति स्मरणात्। एवं सपिंडानां चतुर्थमासादि त्रयेऽपि देशे विशेषणात् सद्यः शौचे
प्राप्ते पंचमषष्ठयोर्विशेषमाह। अंसे मासिद्वये ति। अंसे मासद्वये षण्मासानां मध्ये यद् संमासद्वये पंचमषष्ठाख्यं त
त्र सपिंडास्त्रिदिनमशुचयः स्युरिति संबंधः। तथा च स्मृतिः। पाते मातुर्यथामासं पित्रादीनां दिनत्रयमिति वचना ति ५
त्। अत्र पातः शब्दः पंचमषष्ठमासोपलक्षणपरः। आचतुर्थाद् भवेत् स्रावः पातः पंचमषष्ठयोरिति वचनाच्चे
ति भावः। अतः परं षण्मासादूर्ध्वं सप्तमाष्टमयोः सूतिवत् स्यादाशौचमिति शेषः। सूतिः प्रसवो जननं तत्रत्येति सूत
मास ५ तिवत्। पूर्णप्रसवनिमित्तकं दशाहं नान्यत् गर्भस्रावपातादिनिमित्तकमिति यावत्। सूते दशाहाशौचनिमि
त्तत्वात्। दशाहं शावमाशौचं सपिंडेषु विधीयते। जननेप्येवमेव स्यान्निपुणां शुद्धिमिच्छतामिति मनूक्तप्रसि
द्धा। तथा च स्मृतिः। षण्मासाभ्यंतरे यावद् गर्भस्रावो भवेद्यदा। तदा मास समैस्तासां दिवसैः शुद्धिरिष्यते। अ मात्रे=
त ऊर्ध्वं स्वजात्युक्तेना सामाशौचमिष्यतेति॥ तथा च हारीतोऽपि। जाते मृते मृते जाते सपिंडानां दशाहकमिति।
एतत्स्मृतकस्य चातुर्वर्ण्यसाधारणतामाह। चातुर्वर्ण्यस्य तुल्यमिति। एतदाशौचं चातुर्वर्ण्यस्य चतुर्णां वर्णानां
तुल्यं साधारणं भवति। न कश्चन वर्णकृतो विशेषः। न केवलमिदमेव तुल्यं किंतु वयोवस्थाविशेषविशिष्टोपर
श्लो तिनिमित्तमाशौचं चातुर्वर्ण्यसाधारणमित्याह। वयसि यदिति। यद्वयसि वयोविशिष्टो विशेषोपरतिनिमित्तमा
शौचमात्रं वर्णविशेषोपादानरहितेन विहितमाशौचं देतेऽपि सर्वं चातुर्वर्ण्यस्य तुल्यं भवति। तदुक्तं व्याघ्रपाद
मुनिना। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति। अत्र पुनः स्वपुरुषनिहिते स्वनेनपरपुरुषनिहिते गर्भे ज
ननी व्यतिरिक्तानामाशौचाभावो ध्वनितः॥१॥ इदानीं पूर्णप्रसवनिमित्तमाशौचं द्वितीयश्लोकेनाह॥ जन्माशौ

Indira Gandhi National Centre for the Arts

चांतरालेयदि शिशुन्मरणं नालच्छेदपूर्वकाले निष्प्राणो निष्पद्यते तदा जननजनितमाशौचमस्त्येव कृत्स्नं। प्राङ्नालछेदनाच्छेत्रिय
नमुपगतस्तत्र्यहे शौचं शुद्धिः सर्वेषां सूतिका या स्त्विह चेत् सकलं कं शावशुद्धिस्तु सद्यः॥२॥ जन्माशौचांतराले जन्माशौच
मध्ये नालच्छेदपूर्वकाले नालच्छेदनानंतरं यदि शिशोर्मरणमुपरमः स्यात्। अथवा निष्प्राणः प्राणरहितो निष्पद्यते तदा ज प्रसूत४
ननजनितं जन्मनिमित्तं कृत्स्नं संपूर्णमाशौचमस्त्येव। न शावाशौचेन जननशौचनिवृत्तिः। किंतु जन्माशौचेनैव शिशु
परमनिमित्ताशौचनिवृत्तिरिति भावः। तदुक्तं वृद्धमनुना। दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः। शावाशौचं न कर्तव्यं
सूत्याशौचं विधीयते इति। चेद्यदि जननानंतरं नालच्छेदात्प्राक् निधनमुपगतस्तर्हि सर्वेषां पित्रादीनां त्र्यहे शौचं शुद्धिः स्या
दिति शेषः। इह विषये सूतिकायाः मातुः सकलं संपूर्णं प्रसवनिमित्तं दशाहादिरूपमाशौचं स्यात्। शावशुद्धिस्तु सद्यः
प्रसवनिमित्तमेवाशौचं भवति न शावमिति भावः। जीवन्जातो यदि ततो मृतः सूतक एव तु। सूतकं सकलं मातुः पि
त्रादीनां त्रिरात्रकमिति वचनात्। यावन्न छिद्यते नालं तावन्नाप्नोति सूतकं। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते इति
॥२॥ कालविशेषेण दशाहाद्याशौचापवदमभिधाय वयोवस्थाविशेषादपि तदपवादं तृतीयवृत्तेनाह॥ स्ना
नं प्राङ्नामतोर्वाक् दंतजननतोहः परेतेऽग्निदग्धेऽदग्धे तत्रापि सद्यस्तदुपरिदिनमात्र्यब्दतश्चोलशून्ये। सच्चौ
ले तु त्रिरात्रं त्रिदिनमितरथाप्याव्रतात् जातसशौचं मातापित्रोस्तु पुत्रे द्वित्रिनमदशने संनिधौ नष्टचेष्टे॥३॥ नामतः प्रा
ङ्नामकरणात् सर्वे परेते उपरते स्नानं स्नानमात्रमेव शुध्युपायेन तु तन्निमित्ताशौचमिति भावः। प्राङ्नामकरणा
त्सद्यः शौचमिति शंखस्मरणात्। नामकरणादूर्ध्वं दंतजननादर्वाक् परेतेऽग्निदग्धे अहः एकरात्रं। अहस्त्वदं
तकन्यासु बालेषु च विशोधनमिति वचनात्। अदग्धे तु सद्यः शुचिः स्नानमात्रादेव। आदंतजन्मनः सद्य इति।
तदुपरि दिनमात्र्यब्दतश्चोलशून्ये तदुपरि दंतजननादूर्ध्वं यावत्त्रिवर्षं चूडाकरणरहिते परेते दिनमेकरात्रं।
आचूडान्नैशिकी स्मृतेति। कृते चौले तु त्रिरात्रमित्याह। सच्चौले इति। सच्चौले कृतचौले परेते त्रि २

रात्रं। निवृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यते इति मनुवचनात्। वर्षत्रयानंतरं अविशेषेण त्रिरात्रमित्याह। त्रिदिनमितरथा
प्याव्रतादिति। इतरथा कृतचौले अपि शा ब्दादकृतचौलेपि च संस्थिते तदुपरि वर्षत्रयादूर्ध्वं अकृतचौलस्यापि या
वदुपनयनं त्रिरात्रमेवाशौचं। अयमर्थः। प्रथमाब्दे कृतचौलस्य यावदुपनयनं तावत् त्रिरात्रं। वर्षत्रयादूर्ध्वं अकृत
चूडस्यापि यावदुपनयनं त्रिरात्रमिति। त्रिरात्रमाव्रतादेशाद्दिति। एवं वयोवस्थाविशेषेणाशौचविशेषमभिधा
य जातसशौचमाह। जातसशौचमिति। तदुपरि उपनयनानंतरं जातसशौचं जातिपरत्वेन विहितं दशाहादिकमि
तियावत्। दशरात्रमतः परमिति वचनात्। एवमविशेषेणाजातदंतमरणे मातापित्रोरपि सद्यः शौचादि
प्राप्तावपवादमाह। मातापित्रोस्तु पुत्रादिनाऽदशने अजातदंते परेते मातापित्रोस्तु त्रिरात्रमेव। न सद्यः
शौचादि। बालानामजातदंतानां त्र्यहाच्छुद्धिरिति। कश्यपस्मरणात्। वैजिकादपि संबंधादनुरुंध्यादघंत्र्य
हमिति स्मृत्यंतरात् च। एतत्स्नानं प्राङ्नामतोर्वाक् दंतजननतो हरिसादिकं पूर्वोक्तं सर्वं संनिधौ शि
शुमरणे वेदितव्यमित्याह। संनिधौ नष्टचेष्टे इति। संनिधौ समीपे नष्टचेष्टे नष्टा चेष्टा यस्येति मृते यावत् इति
असंनिधाने शिशुमरणे एतदतिक्रांताशौचं न भवतीति भावः। तदुक्तं व्याघ्रपादमुनिना। उपनीते तु
विषमं तस्मिन्नेवातिकालजमिति॥३॥ अथ चतुर्थवृत्तमाह॥ ऊनद्व्यब्दे लसंज्ञे जनिकरजननी सोदरा
णां दशाहं यद्वा स्पृश्यत्वमेवाधिकमिह विषये सूतकं तु रात्रिं त्रिरात्रं। स्त्रीषु स्नानेन शुद्धे त्रिपुरुषविषये ज्ञातिरा
क्षौरकालादर्वाग्वाग्दानतो क्रांत्रिभिरुपयमनादूर्ध्वगोत्रं स्वकं च॥४॥ अर्धपद्यस्यायमर्थः। जन्मतऊ
र्ध्वं ऊनद्व्यब्दे अपूर्णद्विवर्षे असंज्ञे गतसंज्ञे उपरते इति यावत्। जनिकरः पिता जननी माता सोदरा भ्रात

अथ प्रकारांतरेणाशौचविशेषमाह॥=

Indira Gandhi National Centre for the Arts

त्रिं०टी०
३

२ एषां दशाहमाशौचमित्येकः पक्षः। गर्भस्थे प्रेते मातुर्दशाहं जाते प्रेते उभयोः दशाहं सूते नष्टे सोदराणामिति पैंग्यव
चनात्। अथात्रैव विषये पक्षांतरमाह। यद्वेति। अथवा पित्रादित्रयस्य त्रिरात्राशौचं स्पृश्य लमेवाधिके सूते कर्मा
नधिकारिलक्षणं त्रिरात्रं सपिंडैः सह समानमिति भावः। एतच्च पक्षद्वयं। त्रिरात्रं दशरात्रं वाशावमाशौचमिष्य
ते। ऊनद्विवर्षे उभयोः सूतके मातुरेव हीत्येतद्व्याख्याने विज्ञानेश्वराचार्यैः स्पष्टीकृतं। अथोत्तरार्धेन स्त्रीषु वयोवस्था
विशेषादाशौचविशेषमाविष्करोति। स्त्रीषु स्नानेनेति। नामाकरणादूर्ध्वं क्षौरकालादर्वाक् यान क्षौरकालं स्त्री
षु कन्यासु मृतासु त्रिपुरुषविषये यावत्त्रिपुरुषं यो ज्ञातिः स स्नानमात्रेण शुध्येत्। अत्र त्रिपुरुषविषये सने
न कन्यानां सापिंड्यं त्रिपुरुषं। अप्रदत्तानां तु स्त्रीणां त्रिपुरुषं विज्ञायत इति वसिष्ठोक्तमभिमतं। एतच्च सद्यः शौ
चं अनूढायां तु कन्यायां सद्यः शौचं विधीयते इत्यापस्तंबस्मरणात्। वाग्दानतो वा क् प्रथमं चूडाकरणादनंतर
मूढायां एकेनैव दिवसेन ज्ञातिः शुध्येदिति पूर्वेणासंबंधः। अहस्त्वदत्तकन्यासु बालेषु च विशोधनमिति स्म
रणात्। त्रिभिरूपयमनादिति। वाग्दानोत्तरमुपयमनाद्विवाहादर्वाग्भर्तृगोत्रस्वकपितृगोत्रं च त्रिभिर्दिनैः
शुध्येत्। इयं शुद्धिः स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यंति बांधवाः। यथोक्तेनैव कालेन शुध्यंति तु सनाभय इति
मनूक्ता वेदितव्या। ४। चतुर्णां साधारणीं शुद्धिमुक्त्वा वर्णविशेषेण द्वादशाहाद्याशौचविशेषं पंचमवृत्त
पूर्वार्धेनाह। जन्मन्युपेतमृतावपि च दशनिशा द्वादशाहानि पक्षं मासं वर्णैः क्रमेण शुचयः उचितकृच्छू
द्रजातिस्तु पक्षं। वानप्रस्थे यतौ वोपरमति कुलजे षंडके वा प्लवः स्याद्योषिज्ञो विप्रगुरौ समृतवति च द्विनं यु
द्धविद्धे च सद्यः। ५। जन्मनि जननाशौचे उपेत उपनीतः कृतयज्ञोपवीतः। उपेत एवोपेतस्तस्य मृत्यौ उपनी
तमरणे सति ब्राह्मणाद्याश्चत्वारो वर्णाः क्रमेण दशनिशादिकालमशुचयः स्युः। ब्राह्मणो दशाहं। क्षत्रियो ३

द्वादशाहं। वैश्यः पक्षं पंचदशाहं शूद्रो मासं त्रिंशद्दिनान्यनुक्रमेण उचितकृत्याकृद्यस्तद्द्विजशुश्रूषादि। विहितक
र्मानुष्ठानशीलः शूद्रः पंचदशाहमेव न मासं। क्षत्रियस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य
तदर्धं न्यायवर्तिन इति वचनात्। इदानीमुत्तरार्धेन कुलसंबंधिपुरुषविशेषोपरमे दशाहाद्याशौचापवादमा
ह। वानप्रस्थेति। कुलजे वानप्रस्थे तृतीयाश्रमिणि यतौ चतुर्थाश्रमिणि षंडके क्लीबे चोपरमति संस्थिते आप्लु
वः स्नानमात्रं शुद्धिकारणं। योषिज्ञो विप्रगुरौ समृतवति दिनमहोरात्रमाशौचं। युद्धविद्धे चेति साक्षाद्युद्धहतेस
द्यः स्नानमात्रेण शुचिः स्यादिति पूर्वेण संबंधः। युद्धघातेन कालांतरमृतानामपि दिनमेव शुद्धिहेतुः। ब्राह्मणा
र्थे विपन्नानां ये योषितां गोगृहे पिवा। आहवे च हतानां च एकरात्रमशौचकमिति स्मृतेः। उद्यतैराहवे शस्त्रैः क्षा
त्रधर्महतस्य च। सद्यः संतिष्ठते यज्ञस्तथाशौचमिति स्थितिरिति मनुस्मरणात्। एतच्च ज्ञातमेवाशुद्धिनिमि
२ त्तमिति निर्णीतं बुधैः ॥५॥ तथा च आशौचनिमित्तज्ञानानंतरमुत्सर्गतो दशाहादिप्राप्तौ क्वचिद्देशकाला
दिभेदेन तदपवादं षष्ठवृत्तेनाह ॥ श्रुत्वातीते दशाहात्प्रभृति विषयके प्राक्त्रिमासात्त्रिरात्रं पक्षिण्याषष्ठमा
साद्दिनमिह नवमात्स्यात्ततः स्नानमात्रं। स्नानं देशांतरस्थे त्वथ पितृविषये देशकालाविशेषात्स्वं
स्वं मातुः सपत्न्यास्त्रिदिनमिदमतिक्रांताशौचं समानं ॥६॥ श्रुत्वेति। अतीताशौचे दशाहात्प्रभृति दशाहा
दिके अतीते अतिक्रांते दशदिनानंतरं ज्ञाते इति यावत्। विषयक इति। यस्मिन्देशे मृतस्तस्मिन्नेव देशे
ज्ञाते सति त्रिमासात्प्राक् प्रथममासत्रये त्रिरात्रं। त्रिमासानंतरं चतुर्मासमारभ्य षण्मासं यावत् पक्षि
णी। पूर्वापरदिनाभ्यां युक्ता रात्रिः प क्षिणी। आगामिवर्तमानाहर्युक्तायां निशि पक्षिणीत्यमरः। षण्मासा
दूर्ध्वं यावन्नवमासपर्यंतं दिनमहोरात्रं। ततो नवममासादूर्ध्वं स्नानमात्रं स्यादिति संबंधः। मासत्रये त्रिमात्रं स्या

Indira Gandhi National
Centre for the Arts

त्रि० श्लो०
८

षण्मासात्पक्षिणी तथा। अहस्तु नवमादर्वाग् ऊर्ध्वं स्नानेन शुध्यतीति वृद्धवसिष्ठस्मरणात्। देशांतरमृतिश्रवणे वि
शेषेण स्नानमेव साह। स्नानं देशांतरे इति देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ। मृते स्नानेन शुध्यंति गर्भस्रा
वे च गोत्रिण इति स्मरणात्। देशांतरलक्षणमाह बृहस्पतिः। महानद्यंतरं यत्र गिरिर्वा व्यवधायकः। वाचो यत्र वि
भिद्यंते तद्देशांतरमुच्यते। देशांतरं वदंत्येके षष्टियोजनमायतं। चत्वारिंशद् वदंत्यन्ये त्रिंशदन्ये तथैव च। ए
तस्यापवादमाह। त्वेष पित्रिति। सर्वदेशे सर्वकाले पितुर्मातुश्च मरणे सुतानां स्वस्वजातिविहितं द
शाहादिकं। पितृविषये इति माता च पिता च पितरौ तौ विषयो यस्येति समासः। तथा च। पितरौ चेन्मृतौ
स्यातां दूरस्थोपि हि पुत्रकः। श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेदिति वचनात्। अपरं मातुर्विशेषमा
ह। मातुः सपत्न्यास्त्रिदिनमिति। मातुः सपत्नीभूता याभि सपरमातरि मृतायां पुत्रस्य देशकालवि
शेषात् त्रिरात्रमाशौचं। तदुक्तं। पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः। संवत्सरे व्यतीतेपि त्रिरा
त्रमशुचिर्भवेदिति। अत्र शावशब्देनातिक्रांते जन्माशौचे अशुद्धिर्नैवेति सूचितं। तदुक्तं। नाशुद्धिः
प्रसवाशौचे व्यतीतेषु दिनेष्वपीति देवलेन। एतदतिक्रांताशौचं सर्ववर्णसाधारण्यमिसाह। इदं अ
तिक्रांताशौचं समानं सर्वसाधारणमित्यर्थः। प्रोषिते कालशेषः स्यादश्लेषे त्र्यहमेव हि। सर्वेषां व
त्सरे तीते प्रेते दत्वोदकं शुचिरिति वचनात्। तुल्यं वयसि सर्वेषामतिक्रांते तथैव चेति व्याघ्रपादवच
नात्। ६॥ स्वकुलोत्पन्नमृताशौचमुक्त्वा कुलांतरमिश्रितानामपि मृतानामाशौचमाह। स समाप्ट
मनवमलक्ष्ये णों स्त्रिभिर्व्रतैः॥ पित्रोर्गेहे समूढा प्रसवमरणयोरेकरात्रं त्रिरात्रं स्यातां पित्रादिका
नामथ पितृमरणे मूढपुत्र्यास्त्रिरात्रं। प्रेते श्वाचार्य मातामहदुहितृसुतश्रोत्रियर्त्विक्सयज्यस्वस्त्री ८

=उच्यते। मातामहदुहितृसुतशब्दास्तु प्रसिद्धाः= =उपाध्याय इति यावत्=

मेडुत्रिरात्रं त्रिदिवसमशुचिः सोदकस्तूभयत्र॥ ७॥ पित्रोर्मातापित्रोर्गेहे समूढा प्रसवमरणयोः सम्यगूढायाः
परिणीताया ये प्रसवमरणे तयोः पित्रादिकानामेकरात्र रात्रित्रये यथाक्रमेण स्यातां। यदा मातृगृहे समूढपरि
णीता कन्या प्रसूता मृता वा भवति तदा तस्याः पित्रादिकानां क्रमादेकरात्रत्रिरात्रे स्यातां। प्र.। सवे चैकरात्रम
रणे त्रिरात्रमित्यर्थः। अत्र पित्रोर्गेहे समेन न भर्तृगेहे प्रसूतायां मृतायां वा पितृपक्षाणां सर्वेषामाशौचाभा
वः सूचितः। तथा च विष्णुः। सुसंस्कृतासु नारीषु नाशौचं पितृपक्षके। तत्र सवस्तुमरणं तत्कृहे मे.. त्रिरात्र
कमिति। अथ पितृमरणे मूढपुत्र्यास्त्रिरात्रमिति। अथशब्देनाधिकारांतरसूचना। ऊढपुत्र्याः परिणीत
कन्यायाः पितृमरणे मातापित्रोर्मरणे त्रिरात्रं। पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत्। त्रिरात्रेणैव शु
द्धिः स्यादित्याह भगवान्यम इति वृद्धयाज्ञवल्क्यस्मरणात्। प्रेते श्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्स
याज्यस्वस्त्रीयेषु त्रिरात्रं। अत्राचार्यशब्देन उपनयनपूर्वकं च वेदाध्यापकः स आचार्यः। तत्राह याज्ञवल्क्यः।
उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सांगं च सरहस्यं च तमाचार्यं प्रचक्षते इति। एकदेशमध्यापक उपा
ध्याय सलिंग्य स्स रुदुच्यते। एकशाखाध्ययनक्षमः श्रोत्रियः। सलिगाध्वर्यु .. दियज्ञे कर्मकृत् ऋत्विक्। स याज्यो
यजमान सहितः। शेषाः प्रसिद्धाः। एतेषु मृतेषु त्रिरात्रमाशौचं॥ त्रिदिवसमशुचिः सोदकस्तूभयत्रेति। सो
दकः समानोदकः सप्तपुरुषादनंतरं सप्तपुरुषावसानः उभयत्र जाताशौचे मृताशौचे च त्रिदिवस
मशुचिरशुद्धः स्यात्। तथा च बृहस्पतिः। अहं मातामहाचार्य श्रोत्रिये चाशुचिर्भवेदिति। तथा प्रचेताः। मृ
ते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यतीति। संस्थिते पक्षिणी रात्रिं दौहित्रे भगिनीसुते। संस्कृते तु त्रिरा
त्रं स्यादिति धर्मो व्यवस्थित इति याज्ञवल्क्यस्मरणात्। जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते। शावसू
ते

Indira Gandhi National
Centre for the Arts

त्रि॰ श्लो॰ ५ दोविशुध्यंतिमहादुदकदायिनइतिमनुः॥७॥अथाष्टमंवृत्तं॥पक्षिण्याशौचमृत्विग्दौहित्रसुतसहाध्यायिबं
धुत्रयांतेवासिश्वश्रूसुमित्रश्वशुरभगिनिकाभागिनेयप्रयाणे।मातामह्यांचपित्रोःस्वसरिचविरतेमा
तुलेमातुलान्यांचाथोसज्योतिरेवस्वविषयनृपतौग्रामनाथेचनष्टे॥८॥सत्विगादयोभागिनेयांताः
प्रसिद्धाः।तेषांप्रयाणेमृतौमातामह्यांचविरतायांपित्रोःस्वसरिपितृष्वसरिमातृष्वसरिचविरता
यांमातुलेचविरतेमातुलान्यांमातुलपत्न्यांविरतायांचपक्षिण्याशौचंकारितं।अथोसज्योति
रिति।स्वविषयनृपतौस्वदेशाधिपतौग्रामनाथेचनष्टेसज्योतिरेवकालःशुद्धिहेतुः।समानंज्योतिरा
दित्योनक्षत्रंवायस्मिन्ससज्योतिः।दिवानष्टस्ययावत्सूर्यदर्शनमशुद्धिः।नक्षत्रदर्शनाच्छुद्धिः।रात्रिन
=कालः।तं= ष्टस्यरात्र्यवसानपर्यंतमेवाशुद्धिः।रवेर्दर्शनाच्छुद्धिरित्यर्थः।अथयेषांपूर्ववृत्तेत्रिरात्रंउदितंतेषांपुनः
धाने=७ एतस्यपक्षिण्यभिधानस्यश्वशुरयोर्भगिन्यांचमा
पक्षिणीकथनेदेशकालादिभेदतोव्यवस्थापनीयं।एतस्यपक्षिण्यशौचस्यनिर्देशः।मातुलेश्वशुरेमित्रेगुरोगुर्वंगना
तुलानांचमातुले।पित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशां।मातुलेश्वशुरेमित्रेगुरौगुर्वंगनायांच।सहाध्यायिनि
स्नुचा।आशौचंपक्षिणीरात्रिंमृतामातामहीयदीति।तथापक्षिणीमसपिंडेयोनिसंबंधेसहाध्यायिनि
चेसादिवचनानिमूलं।अथसज्योतिरेवेसत्रप्रेतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थितिरितिमनुः।ग्रामेश्व
रेकुलपतौश्रोत्रियेचतपस्विनि।शिष्येपंचत्वमापन्नेशुद्धिर्नक्षत्रदर्शनादिति।वृद्धयाज्ञवल्क्यवचनं॥८॥
अथनवमवृत्तं॥शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषुस्वगृहपर
मृतोमातुलेचैकरात्रं॥रात्रिंसब्रह्मचारिण्यथतुकथमपिस्वल्पसंबंधयुक्तेस्नानंवासोयुतंस्यादिदम
पिसकलेसर्ववर्णेषुतुल्यं॥९॥एकदेशाध्यापकःउपाध्यायः।अनूचानोगानोवक्ता।सप्तमपुरुषादूर्ध्व ५

चतुर्दशायकृषावसानःसगोत्रः॥इतरत्स्पष्टं।एषुशिष्यादिषुप्रमीतेषुएकरात्रमहोरात्रमाशौचमितिशेषः।त
थास्वगृहपरमृतोमातुलेचैकरात्रं।तथासब्रह्मचारिणिरात्रिरेका।आचार्यपत्नीतःसब्रह्मचारीतस्मिन्मृतेरा
त्रिमहोरात्रमाशौचं।गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषुचेतियाज्ञवल्क्यस्मरणात्।मातुलगृहेनात्म
बांधवपितृबांधवमातृबांधवाश्चोपलक्ष्यंतेतिविज्ञानेश्वराचार्यैर्व्याख्यातत्वात्।त्रिरात्रमाहुराशौचमा
चार्येसंस्थितेसति।तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिरितिमनुस्मरणात्।अहस्त्वेकोदकानांतुगो
त्रजानामहःस्मृतमितिजाबालिवचनात्।असपिंडेस्ववेश्मनिमृतेएकरात्रमितिविष्णुस्मरणात्।अत्र
ग्रामस्यसमानग्रामीणस्यग्रहणंद्रष्टव्यं।ए
षांपुनर्ग्रहणंतेषामसन्निधानादिनाव्यवस्थाद्रष्टव्या।श्रोत्रियमस्यसमानग्रामीणस्यग्रहणंद्रष्टव्यं।ए
काहंसब्रह्मचारिणिसमानग्रामीणेचश्रोत्रियेविद्यासाश्वलायनवचनात्।अथतुकथमपिस्वल्पसंबंध
युक्तेस्नानंवासोयुतंस्यात्।अथशब्दोधिकारांतरसूचनार्थः।कथमपिकेनापिप्रकारेणस्वल्पेनापि
संबंधेनसंबंधिनिभगिन्यादौसंस्थितेवासोयुतंसचेलंस्नानंशुध्यैस्यादिति।सचेलस्नानाच्छुद्धिरिति
भावः।तदुक्तंयाज्ञवल्क्यमुनिना।भागिन्यांसंस्कृतायांतुभातर्यपिचसंस्कृते।मित्रेजामातरिप्रेतेदौहित्रेभ
गिनीसुते।शालकेतत्सुतेचैवसद्यःस्नानेनशुध्यतीति।इदमप्युक्तंसकलमाशौचंसर्ववर्णेषुतुल्यं।सा
धारणमितिस्पष्टं।९॥इदानीमाशौचमध्येआशौचांतरसंनिपातेदशमवृत्तेननिर्णयमाह॥बह्वाशौ
चस्यमध्येत्वपरमपिसमंस्वल्पकंवासजातिप्रेतेजातंसंतरंनायदिभवतितदापूर्वशेषेणशुद्धिः॥द्वा
भ्यांतद्रात्रिशेषेत्रिभिरपरदिनेयामिनीयामशेषेनैवाशौचेनापि अपितुरूपशमनेपक्षिणीमातृमृत्यो॥१०॥

Indira Gandhi National
Centre for the Arts

१ एवंप्रवृत्ताशौचस्य = १

त्रिं०टी०
६
वृद्धाशौचस्य मध्ये यदि तु पुनः अपरमपि अन्यदपि समं दशाहाशौचं मध्ये दशाहमेवाशौचांतरं स्वल्पकं वा त्रि
रात्रादिकं आशौचं सजाति समानजातीयं जाताशौचं मध्ये जाताशौचं प्रेताशौचमध्ये प्रेताशौचं भवति
तदा पूर्वशेषेण शुद्धिः। समं स्वल्पकं वेत्यनेन स्वल्पाशौचमध्ये पतितदीर्घाशौचस्य न पूर्वशेषेण शुद्धि
रित्यादि वेदितं ज्ञापितं। तदुक्तमुशनसा। स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि। न पूर्वेण विशुद्धिः
स्यात्स्वकालेनैव शुध्यतीति। तथा गतेप्रेताशौचमध्ये यदि जायंतरं विजातीयाशौचं जननाशौचं तदा पू
र्वशेषेण मृताशौचेनैव शुद्धिः। एतेन जाताशौचमध्ये जातस्य प्रेताशौचस्य न पूर्वेण शुद्धिरिति ज्ञापितं। शा
तस्य पूर्वा=
शौचस्य ७
२ पूर्वाशौचं=
वेन शुध्यते सूतिर्न सूतिः शावशोधनीति। द्वाभ्यां तदितात्। रात्रिमात्रावशेषे यदाशौचांतरं पूर्वोक्तं भवेत्त
दा द्वाभ्यामपरदिनाभ्यां शुद्धिः। त्रिभिरपरदिनैर्यामिनीयामशेषेति। यामिन्यायामे तुरीयप्रहरस्तन्मात्रा
वशेषे त्रिभिरपरदिनैः पूर्वाशौचादधिकैस्त्रिभिर्दिवसैः शुद्धिः। न पूर्वाशौचशेषमात्रेणेति। रात्रिशेषे
सति द्वाभ्यां प्रभाते तिसृभिः स्मृतेति गौतमवचनादिति। पित्रोर्विशेषमाह। नेनाशौचेन पित्र्यं अन्याशौ
चमध्ये पतितं यस्मिन्न्यं मातापित्रसंबंध्याशौचं तत्पूर्वाशौचशेषेणानेव शुध्येत्। किंतु पितुरूपरमे मातु
र्वा परमे तद्दशाहमेवाशौचं धार्यमिति भावः। तयोर्मातापित्रविरतिनिमित्तयोः परस्परसंनिपातेपि पू
र्वाशौचशेषेण न शुद्धिः। किंतु मात्राशौचमध्ये पतितस्यापि पित्राशौचस्य न संकोचः। न मात्राशौचशेष ६
माता तं यस्य १
पित्राशौचस्य शुद्धिः स्यात्। मातुर्विशेषमाह। पितुरूपशमेनेति। पितुरुपशमने सति मातृमृतौ पि
त्राशौचमध्ये मातृमृतौ पक्षिणी अधिका कार्या न यावद्दशाहमिति भावः। पितृमरणादिनमारभ्याशौचां

२ = पित्राशौचमध्ये पतितस्य = २ ३ = पूर्णमेव यावद्दशाहं कार्यमिति भावः = ३

३ = प्रकांतरमाह। =

तन्मध्ये चेन्मातृमरणं तदा मातृमरणनिमित्ताशौचनिमित्तां पक्षिणीमधिकां कृत्वापि तु राशौचशुद्धिः कर्त
व्येत्यर्थः। तथा च स्मृतिः। मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता। पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु
पक्षिणीमिति॥१०॥ अथैकादशरत्तं सर्वत्राशौचमेतु यदि विदितमिदं शेषमात्रेण शुद्धिर्दाहादाहिता
ग्नेर्मरणदिवसतोन्यत्र कुर्याद्दशौचं। पूर्वौ स्नात्वा सचैलं विहितं हि तत्कृतावर्हकाः सूतिका तु त्रिंशद्रात्रेन
योग्या पितृसुरकर्यो विशातिः पुत्रसूस्तु॥११॥ सर्वमिदमाशौचं यथाशौचांतरमध्ये एवं विदितं ज्ञातं भवति
तदा शेषमात्रेण शुद्धिः। दशमध्ये यावंत अवशिष्टानि दिनानि तावन्मात्रेण शुद्धिर्न ज्ञानदिनादारभ्य द
शाहमिति यावत्। एवं त्रिदिनाद्याशौचेपि द्रष्टव्यं। प्रोषिते कालशेषः स्यादिति यज्ञवल्क्यः। दाहादाहादे
=विधिरि=
हिताग्नाविति। इदमाशौचं। आहिताग्नेर्दाहाद्दाह दिवसतो दशदिनं कुर्यात्। न मरणदिवस
तइति। अन्यत्रानाहिताग्नेर्मरणदिवसतः कुर्यान्न दाहदिवसादित्यर्थः। अनग्निमत उत्क्रांते सा
ग्नेः संस्कारकर्मणः शुद्धिः संचयनं दाहान्मृतहि स्तु यथातिथीति संगिरोवचनात्। आशौचांतेयत्स्ना
त्वाशुचिर्भवति तदाह। पूर्वौ स्नात्वेति। पूर्णे आशौचे सचैलं सवस्त्रं यथा भवति तथा स्नात्वा वि
=हित=
हितं कृतौ देवकार्ये पितृकार्ये च अर्हकाः योग्याः स्युरिति यज्ञतयत इति शेषः। सूतिका यास्तु विशे
षमाह॥ सूतिकात्विति। सूतिका पुनस्त्रिंशद्रात्रं मासमात्रं पितृकरणे पितृकार्ये सुरकरणे
देवकार्ये न योग्या न शुद्धा भवतीति भावः। एतावत्कन्याप्रसवे। पुत्रप्रसवे तु विशेषमाह॥

Indira Gandhi National
Centre for the Arts

३=प्रकारांतरमाह।=

त्रि० श० विंशतिः पुत्रसूस्त्रिति। पुत्रसूस्तु विंशतिदिनान्युभयकार्येनयोग्या शुद्धा न भवतीत्यन्वयः॥ सू
तिकां पुत्रवतीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीमिति पैठीनसिवचनात्॥११॥
७ अथ द्वादशवृत्तं॥ निर्हृत्यान्यप्रमीतं दिवसमाशुचिकोथास्ववर्णं तदुक्ताशौचोथानाथमा
घक्रतुशतफलभागाप्लवेनैव शुध्येत्। नीलोपाध्यायमातापितृपरमगुरून्ब्रह्मचारी नदो
षी तेभ्योऽन्यं निर्हृतो स्यव्रतमपि विततं भ्रश्यते वश्यमेव॥१२॥ अन्यं सवर्णमसपिंडं प्रेतं नि
र्हृत्य दिवसमशुचिर्भवति। एतदहोरात्रमत ऊर्ध्वं वासिनोऽ तदन्नभोजिनो ज्ञेयं। तदृह्वा
हं यदि वसमशुचि ... असपिंडं द्विजं प्रेतं विप्रो
सिनस्तु त्रिरात्रं। तदन्नाशिनस्तु दशरात्रं रोमिति ज्ञेयं॥ तथा च मनुः॥ असपिंडं द्विजं प्रेतं विप्रो
निर्हृत्य बंधुवत्। विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवानिति। यद्यन्नमत्ति तेषां तु दशा =असमानजा=
व हेनैव शुध्यति। अनदन्नन्नमह्नैव न चेत्तस्य गृहे वसेदिति। अथ स्ववर्णानिर्हृत्य तदुक्ताशौचः॥ य =तीयरे
ज्जातीयस्य निर्हरणं करोति तदुक्ताशौचः। ब्राह्मणश्चेत् शूद्रं निर्हरेत्तदा मासमशुचिः। तथा
शूद्रश्चेद्ब्राह्मणं निर्हरेत्तदा दशरात्रमित्यादि ज्ञेयं॥ एवमवरश्चेद्द्वयोः पूर्ववर्णमुप राम
स्पृशेत् पूर्वो वाऽवरं तत्र शवोक्तमाशौचमिति गौतमवचनात्॥ अत्र निर्हरणा ७

पस्पर्शाभ्यां प्रेतवहनं ज्ञेयं। एतस्यापवादमाह॥ अथानाथमिति। अनाथप्रेतं निर्हृत्याघक्र
तुशतफलभाग्भवेत्। स्वतकं तस्य नैव संभावनीयं। किंतु आप्लवेनैव शुध्येत्। आघक्रतुर्ज्योतिष्टो
मः। आप्लवः स्नानं। एवकारेण स्नानानंतरमाशौचनिवृत्तिः प्रतिपादिता। यथाह पराशरः॥ अनाथं
ब्राह्मणं प्रेतं ये वहंति द्विजातयः। पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते। न तेषामशुभं किंचित्पापं वा शु दि
भकर्मणां। जलावगाहनेनैषां सद्यः शौचं विधीयत इति। अथ ब्रह्मचारिणो विशेषमाह। नीलोपाध्या
येत्यादि। उपाध्यायादीन्निर्हृत्य ब्रह्मचारी न दोषी दोषभाङ् भवति। ब्रह्मचर्यव्रतान्न भ्रश्यत इति। आ
चार्यं चोपि ह्युपाध्यायान्निर्हृत्याप्यव्रती व्रतीति याज्ञवल्क्यवचनात्। अन्यनिर्हरणे दोषमाह। तेभ्योन्य
मित्यादि। तेभ्य उपाध्यायादिभ्योऽन्यं निर्हरतो स्य ब्रह्मचारिणो विततं विस्तृतं व्रतमप्यवश्यमेव भ्र
श्यते ब्रह्मचर्यव्रताच्युतो भवतीति यावत्। अथ ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मा
तापित्रोरिति वसिष्ठवचनादिति भावः। तथा च माधवीये॥ आचार्यं वाप्युपाध्यायं गुरुं वापि
तरं तथा। मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनं॥ कुर्यान्न च तैः सह संवसेत्॥ एकाहमशुचिर्भूत्वा द्वि
तत्र भक्षयेत्॥ अन्यत्र भोजनं कुर्यान्न च तैः सह संवसेत्॥

४=व्रतस्योपरमे चास्य पातित्यं भवति ध्रुवमिति=४

Indira Gandhi National
Centre for the Arts

त्रि० श्र०
८

तीयेहनि शुध्यतीत्येव परमर्थस्तदाशौचभागिनस्याप्येवमेवार्थः संवत्सरोपि॥ पित्रोर्गु
रोर्विप्रस्तोतु ब्रह्मचर्यपि यः सुतः। सव्रतश्चापि कुर्वीत त्वग्निपिंडोदकक्रियां। तेनाशौ
चं न कर्तव्यं संध्या चैव न लुप्यते। अग्निहोत्रं च कर्तव्यं सायं प्रातश्च नित्यश इति॥१२॥ एवं
निर्हरणाशौचमुक्त्वानुगमनाशौचं त्रयोदशवृत्तेनाह॥ तुल्योत्कृष्टानुयाने वसनसहि
तकोंभस्यथाप्लुत्य वह्निं स्पृष्ट्वाज्यं प्राश्य शुध्येदथ दिनमशुचिर्हीनवर्णानुयाने। पक्षिण्येकां
तरानुव्रजन इह भवेच्चांतरे तु त्रिरात्रं कृत्वा स्नात्वासुनघामसुयमनशतं सर्पिराशं च कु
र्युः॥१३॥ तुल्योत्कृष्टानुयाने। ब्राह्मणस्य ब्राह्मणानुगमनं तुल्ययानं। एवं क्षत्रियादेः स्व
स्ववर्णानुगमनं तुल्ययानं। उत्कृष्टानुगमनं। क्षत्रियस्य ब्राह्मणानुगमनं तथैव वैश्यस्य शू
द्रस्य ब्राह्मणक्षत्रियानुयानं। शूद्रस्य ब्राह्मणक्षत्रियवैश्यानुयानं। तस्मिंस्तुल्योत्कृष्टानुयाने कृते
वसनसहितकोवस्त्रसहितः सरिनद्यादावाप्लुत्य स्नात्वाग्निं स्पृष्ट्वाज्यं घृतं प्राश्य विशुध्येत्। सुप्रसिद्ध

८

मेतद्वाक्यार्थकथनं। अत्र च। अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा। स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य
विशुध्यतीति मनुवचनं मूलं॥ हीनानुगमनाशौचमाह॥ अथ दिनमशुचिरिति। हीनवर्णानुयाने
ब्राह्मणस्य क्षत्रियानुयाने क्षत्रियस्य वैश्यानुयाने वैश्यस्य शूद्रानुगमने। क्षत्रियाद्यनुगमने ब्रा
ह्मणो हर्दिनमहोरात्रमशुचिरशुद्धो भवतीति शेषः॥ पक्षिण्येकांतरेति। एकांतरानुव्रजने ब्राह्मण
स्य वैश्यानुगमने क्षत्रियस्य शूद्रानुगमने पक्षिणीमशुचिर्भवेत्॥ अंतरे तु त्रिरात्रं। ब्राह्मणस्य शूद्रा
नुगमने त्रिरात्रमशुचिर्भवेदिति भावः॥ त्रिरात्रानंतरं कृत्यमाह॥ त्रिरात्रं कृत्वा नंतरं सुनघामुत्तमज
ले स्नात्वा सुयमनशतं प्राणायामशतं कृत्वा सर्पिराशं घृतप्राशनं कुर्युः। ततः शुद्धा भवंतीत्यर्थः। त
था च पराशरः। प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रिरात्रेण शुध्यतीति।
त्रिरात्रे तु तथा पूर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति॥ ॥१३॥
अथ चतुर्दशवृत्तमाह॥ ॥ तातां बाचार्यकेभ्यो नलजलतिलदो ब्रह्मचारी तदीयाशौचोन्येभ्यस्तु

Indira Gandhi National
Centre for the Arts

१

६ हृः पुनरुपनयनं चाधिकं कारयेत्तु॥ अन्ये त्वत्रातिकेभ्यो यदि दद्ध इति तदा तत्र युक्ता अशुभाः स्युः कुर्युः कृच्छ्र
पंचाधमदहनविधौ तं तमेवाप्नुवंति॥१४॥ ॥तातः पिता। अंबा माता। आचार्यो गुरुरेभ्यो यो ब्रह्मचारी
अनलजलतिलदः। एवं विधो ब्रह्मचारी तदीयाशौचस्तदीयाशौचवान् भवति तदीयाशौचशुद्ध्या शुद्धो भ
वतीति भावः। अन्येभ्यस्तु तद्दः अनलजलतिलदः तदीयाशौचः सन्नाशौचांते पुनरुपनयनमधिकं का
रयेदात्मनः शुद्धो भवतीत्यभिसंधिः। एतच्चा॥ आचार्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती॥ शकटान्नं न
चाश्नीयान्न तु तैः सह संविशेदित्येतद्व्याख्यानावसरे मिताक्षरायां स्पष्टीकृतं॥ अन्ये त्विति। अन्ये ब्रह्मचा
रिव्यतिरिक्ता अत्रातिकेभ्यो यधनलजलतिलदास्तदा तत्र युक्ताः अशुभाः स्युस्तदाशौचेनैवाशौच
वंतः स्युरिति तात्पर्यं। अधिकं कृच्छ्रत्रयं कुर्युस्ततः शुद्धा भवंतीति भावः॥ अधमदहनविधाविति। पृथु
अ॰प॰२ त्रमौ मदाहं कुर्वंति तदा तं तमेवं भायं प्राप्नुवंति तेनाधमेन तुल्या भवंतीत्यर्थः॥ ॥१४॥ ॥अथ स्त्रीणा शुम॰
तरमतस्य दशाणलाभे दाह विधिं पंचदशाद्दत्तेनाह॥ ॥पालाशीमाहिताग्नेः प्रतिकृतिमथवा स्त्रीनिद ६

=१ स्वनमेयं=२

स्त
ग्ध्वा दशाहाघाशौचं ज्ञातयः स्युस्तदूतरं त्रिरात्रं तु चैवं कुर्युः॥ अन्यो विप्राघशौचे सकृद्दहनमदं
स्तावदाशौचं कृत्स्नाघावं तेषां तदंते व्रतमपि विचरेद्द्वादशेनैकरात्रं॥ ॥१५॥ ॥आहिताग्नेः पुत्रैर्भिः प्र
तिकृतिं कृत्वा तद्दलाभे शमनकाशिं त्योक्तविधिना पालाशैः प्रतिकृतिं कृत्वा तां दग्ध्वा ज्ञातयो दशाहा
घाशौचाः स्युः। ततस्तदूर्णामनाहिताग्नीनां पालाशादिप्रतिकृतिं कृत्वा तां दग्ध्वा च ज्ञातयस्त्रीण्य
हानि आशौचं कुर्युः। दिनत्रयमेवाशौचं कुर्युरिति भावः। अत्रोभयत्र वसिष्ठवचनं। आहिताग्निश्चेत्प्र
वसन्म्रियेत पुनः संस्कारं कृत्वा शववदाशौचमिति। तथा। स्वपिष्टे जलसंमिश्रे दग्धव्यस्तथाग्निना। अ
सौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा सबांधवैः। एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेदिति मूलं॥ अन्यो विप्रा
दिति। अन्यो ऽसकुल्या दशाहाघाशौचवतां गेहे सकृदेकवारमदनं मन्नं भुंजंस्तावदाशौचं तेषां याव
त्कालमाशौचं तावदिति यावत्। तदंते आशौचांते व्रतमपि विचरेत्। आशौचांते पयस्यकृतं विहितं त
दपि चरेत्कुर्यात्॥ उभयत्र दशाहानि कुलस्यान्नं न भुज्यत इति निषिद्धाचरणादिति भावः॥ न भुंजीत कुल

Indira Gandhi National
Centre for the Arts

स्यात्तं सूतके मृतके पिबा । भुक्त्वा कुर्यादित्याह । निःसूतकं शुभपत्रं चेति स्मृते ॥ रोदनेनैकरात्रमिति । प्रेत
१० सपिंडैः सह रोदनमेकरात्रमहोरात्रमाशौचं कृत्स्यादित्यन्वयः । तथा च पराशरः । मृतस्य बांधवैः सार्द्धं कृत्वा
तु परिदेवनं । वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म चेति ॥ ॥१५॥ ॥ अत्राशौचशब्देनाशुचित्ववाचिना
स्पृश्यत्वस्वरूपस्य प्रतीतौ जातायां जन्माशौचे तदपवादं बोढव्याहृत्तेनाह ॥ ॥ जन्मन्यस्पृश्यता नो भ
वति कुलभुवां मातृवर्जं पितुश्च स्नानादूर्ध्वं सचेलात्स्थनिधनकृताशौचके त्वेत्रिभागे ॥ सर्वां त्रास्योप [illegible] रोस्यो
रीत्थं महति च परिसंचायनं स्यान्मासीतौ चेत्तस्योपरिष्टादथ
तुरहजयोर्दशयोराप्लवोर्ध्वं ॥ ॥१६॥ ॥ जन्मनि जन्मनिमित्तं कुलभुवां सपिंडानां सोदकानां वाऽस्पृ
श्यता नो भवति । मातृवर्जमिति । मातुः सूतिकायाः अस्पृश्यता भवत्येवेत्यर्थः ॥ पितुर्विशेषमाह ॥ पितु
श्च स्नानादूर्ध्वं सचेलादिति । सचेलात्सवसनस्नानादूर्ध्वं पितुरस्पृश्यता नो भवतीति पूर्वेण संबंधः । तथा एम०
च संवर्त्तः ॥ जाते पुत्रे पितुः स्नानं सचैलमभिधीयते । माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुरिति ॥ त १०

थांगिरोवचनं । सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते इति ॥ मृताशौचेप्यस्पृश्यत्वसंकोचमाह ॥ अथे
ति । निधनकृताशौचकेऽस्मिंस्त्रिरात्रादिके त्रिभागे त्रिधा विभक्ते प्रथमांशादुपरितनं पदद्वयं तत्रास्पृ
श्यत्वं न भवतीति संबंधः ॥ इत्थं महति चेति । महति दशाहादिके पीत्थमयमेव प्रकारः ॥ परिसंचायन
मस्थिसंचयनं प्रथमदिवस एव स्यान्मासीतं दैवाद्य [illegible] विभागप्रकारः । परिलक्षतः स्यान्नहितस्योपरि
ष्टादस्थिसंचयनादनंतरं दिनानि त्रिधा विभज्य प्रथमभागं परित्यज्य उत्तरभागद्वयेऽस्पृश्यता नो भव
तीति । तथा च प्रथमभागोऽस्पृश्यत्वमेवेति तात्पर्यं ॥ एतच्च ब्राह्मणक्षत्रियविट्शूद्राणां स्वस्वाशौचकाला
द्विज्ञेयं ॥ स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः । शूद्रविट्क्षत्रविप्राणां यथा शास्त्रं प्रचोदितमिति
स्मरणात् । तथा दशाहादित्रिभागेन कृते संचयने क्रमात् । अंगस्पर्शनमिच्छंति वर्णानां तत्वदर्शिनः ॥ त्रि
चतुःपंचदशाभिः स्पृश्या वर्णाः क्रमेण त्विति देवलस्मरणात् ॥ अथ तुरहजयोरित्यादीति । अथेत्यधिका
रांतरं । तुरहजयोः स्वाहोत्पन्नयोर्दासीदासयोराप्लवोर्ध्वं स्नानानंतरमेव तयोरस्पृश्यता नो भवतीति संबं

Indira Gandhi National
Centre for the Arts

११ घः ॥ १६ ॥ ॥ अथ सप्तदशं वृत्तं ॥ ॥ अन्तेनोपान्त्ययोस्तु त्रिजननिचरणाद्दत्तदासादिकानां स्वाम्याशौ
चाहसंख्यासमदिनगमनादूर्ध्वमन्यत्तु सूतम् ॥ जातेऽपत्ये च तस्मिन्नहनि निशि च तन्मंगलार्थेषु योग्याः
[illegible] सर्वाशौचं सदा नो भवति यतिवनिब्रह्मचर्यस्थितानां ॥ १७ ॥
॥ अन्तेनोपान्त्ययोर्दासीदासयोः त्रिजननिचरणाद्वा त्रित्रयगमनादूर्ध्वमस्पृश्यता नो भवतीति पूर्वेण
संबंधः । तुशब्देन पूर्वस्माद्विशेषो दर्शितः । दत्तदासादिकानां स्वाम्याशौचाहसंख्यासमदिनगमनादूर्ध्व
मस्पृश्यता नो भवतीत्यनेनैव संबंधः । आदिशब्देन क्रयादिनाक्रीतानां संग्रहः । स्वामिनो याम्याशौच
दिनानि तेषां यासंख्या तयासंख्यया समसंख्यदिनानि तेषां गमनादतिक्रमणादूर्ध्वमित्यर्थः । अन्यच्चित्य
नेन दासस्य कर्मण्येव स्पर्शयोग्यता न तु कर्माधिकार इति । तथा सूतिकायाः दास्याः स्वयं प्रसवनिमित्तमस्पृ
श्यत्वं मासमित्येतत्सूतं स्पष्टमिति यावत् । अत्र च दासाघाशौचे सद्यः शुद्धो द्विजो मतः । भक्तदासस्त्र्यहा रा.म.
च्छुचिरिति स्मृतिः । तथा । दासीदासश्च सर्वो वै यस्य वर्णस्य यो भवेत् । तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूत ११

कमित्यंगिरोवचनं । इदानीं जाताशौचे जननिमित्तं यत्कार्यं तत्र शुद्धिमुत्तरार्द्धेनाह । जातेऽपत्ये तु तस्मिन्नह
नि निशि च तन्मंगलार्थेषु योग्याः । अपत्ये जाते तन्मंगलार्थेषु अपत्यमंगलार्थेषु कर्मसु तस्मिन्नहनि त
स्यां निशि च योग्याः स्युरित्यन्वयः । अयमर्थः । अपत्यमंगलार्था ये जातकर्मादिकर्माणि यस्मिन्दिने यस्यां
निशि च विहितानि येषु कर्मसु प्रथमदिवसादिसाध्येषु तस्मिन्दिने तस्यां निशि च सर्वे सूतकिनो योग्या
अधिकारिणो भवंति ॥ तथा च व्यासः । सूतिकावासनिलया जन्मदा नाम देवता । तासां यागनिमित्ता
र्थं शुद्धिर्जन्मनि कीर्तिता ॥ प्रथमेऽहनि षष्ठे वा दशमे चैव सर्वदा । त्रिष्वाशौचं न कुर्वीत सूतके पुत्रजन्म
नीति ॥ उक्ताशौचस्य सर्वस्य पुरुषविशेषेऽपवादमाह ॥ सर्वाशौचमिति । एतत्सर्वमाशौचं सदा सर्व
कालं यतिः संन्यासी वनी वानप्रस्थः ब्रह्मचर्यस्थितः उभयविधो ब्रह्मचारी एतेषां नो भवति । एते यस्मा
दृपः कथंचिदपि आशौचभाजो न भवंतीति भावः ॥ ॥ १७ ॥ ॥ अथ येषु कार्येषु येषां सूतकिनां तात्कालि
की शुद्धिस्तेषां तामष्टादशेन वृत्तेनाह ॥ ॥ तत्र कार्येषु सत्रिव्रतिनृपनपवदास्तित्वित्विकस्वदेहसूर्ध्वंशाप

त्स्यप्पने कृच्छ्रातिपठनभिषक्कारुशिल्प्यातुराणां॥ संप्रारब्धेषु दानोपनयन पज्ञनश्राद्धयुद्ध
१२ प्रतिष्ठाचूडातीर्थार्थयात्राजपपरिणायनाघकस्त्वेषेतदर्थो॥ ॥१८॥ ॥तत्र त्कार्येषु संप्रारब्धेषु यस्य
पानियानिकार्याणि आजीविकार्थं विहितानि तेषु तेषु कर्तव्येषु अनन्यसाध्येषु सत्रादीनां सर्वाशौचं
नो भवतीति पूर्वेणा संबंधः॥ अत्र सत्रिणः सत्रप्रवृत्ताः॥ व्रतिनः प्रारब्धप्रायश्चित्तलक्षणव्रताः॥ नृपो
राज्याभिषिक्तः॥ नृपवचनजसेवकः॥ दीक्षितो यागकर्त्ता॥ ऋत्विजः आध्वर्यवादिकर्मकर्त्तारः॥ अनेकश्रुति
२: पठनो बहुवेदाध्ययनशीलः॥ आतुरो रोगी॥ अन्ये प्रसिद्धः॥ एतेषां सर्वाशौचं नैव भवतीत्यर्थः॥ संप्रारब्धे
ष्विति दानादयउत्सवान्ताः प्रसिद्धाः॥ एतेषु प्रारब्धेषु एतदर्थं एतन्निमित्तकार्येषु सर्वाशौचं न भवतीत्यर्थः
तथा च याज्ञवल्क्यः॥ ऋत्विजां दीक्षितानां तु यज्ञियं कर्म कुर्वतां॥ सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा
॥दाने विवाहे यज्ञे च संग्रामे देशविप्लवे॥ आपद्यपि च कष्टायां सद्यःशौचं विधीयते इति॥ कष्टापदादुर्भि राम॰
क्षाद्याः॥ प्रचेता अपि॥ कारवः शिल्पिनो वैद्या दासीदासास्तथैव च॥ राजानो राजभृत्याश्च सद्यःशौचाः १२

प्रकीर्तिता इति॥ ॥१८॥ ॥इदानीमस्तु विशेषमाह प्याशौचापवादमेकोनविंशेन वृत्तेनाह॥ गर्भाशौचाज्जातयः स्युः पतितपतिसुतब्रह्मविद्घातिनीषु दोषात्पाषंडिचौराश्रमरहितसुरापयहीनोपगासु संदर्पात्सर्पपक्षिक्षितिपपशुदिवाकीर्तिकाद्यैर्हतेषु स्वेच्छापूर्वं च शस्त्रज्वलनजलविषानाशकाद्यैर्मृतेषु॥ ॥१९॥ पतितासु स्मृत्यन्तरोक्तासु पत्यादिघातिनीषु च स्त्रीषु मृतासु प्रसूतासु वा ज्ञातयोऽशौचात्प्रबुद्धा न स्युः॥ तथा दोषाद्दोषहेतुना येषां षडमाश्रयं तेते पाषंडिनः॥ अविहितलिंगधारिणः॥ चोराः प्रसिद्धाः॥ आश्रमरहिताः सत्यधिकारे त्यक्ताश्रमाः॥ सुरापयाः निषिद्धसुरापानरताः॥ हीनोपगाः॥ अधमेन सह संभोगरताश्च याः स्त्रियः आसु मृतासु ज्ञातयो नाशौचाः स्युरिति पूर्वेणा संबंधः॥ अत्र लिंगमविवक्षितं तेन पतितादिषु पुरुषेष्वपि प्रमीतेषु नाशौचमिति भावः॥ तथा संदर्पाद्बलेन बुद्धिपूर्वं सर्पादीन् दिवाकीर्तिश्चांडालस्तत्कृतानपाकर्तुमाभिमुख्येन ये प्रवृत्ताः संतस्तैर्हताः तेषु मृतेषु नाशौचाज्ज्ञातयः स्युः॥ स्वेच्छापूर्वमित्यनेनैभिर्दैवाद्धतेषु आशौचमस्तीत्यर्थः॥ इच्छापूर्वं शस्त्रा

Indira Gandhi National
Centre for the Arts

लोहंज्वलनोग्निर्जलंप्रसिद्धं।विषंवत्सनाभादि।अनाशकंअविहितान्नत्यागः।आदिशब्दाद्विहित
१३ भृगुपतनादिः।एभिःप्रकारैर्मृतेष्वपिज्ञातयोनाशौचाःस्युरित्येतदुक्तंयाज्ञवल्क्ययोगीश्वरैः।पाषंडाश्रा
श्रितास्तेनाभर्तृघ्न्यःकामगादिकाः।सुराप्यआत्मत्यागिन्योनाशौचोदकभाजनाइतिशास्त्रविहितम्रा
स्त्र्यादिमृतावाशौचाद्यस्त्येव।। ।।१९।। ।।इदानीमाशौचविनापवादमुपादयतइंद्रातिततमेनवृत्तेनाह।।
।।नाशौचंशाककाष्ठाजिनलवणात्मशाक्षीरनीराग्निषुपुष्पमूलफलेचौषधिदधिमधक्षुस्वाति
लेषामभोज्ये।।दद्याद्द्यादिमानिस्वयमनुमननात्स्वामिनोयातिजाताशौचेवाहत्रिमेवापणीतम
पणीतंचापिसर्वंशुचिःस्यात्।। ।।२०।। ।।यातिगाच्छतिःमरणंजातंजन्मतत्रिमित्तमाशौचंयाति
ज्ञाताशौचंतस्मिन्नुत्रिमेवानिमित्तांतरकेप्राप्तेतिवाशौचेमतिरेखुरणाकादिष्वाममोज्यांतिपुरस्थेषु
आशौ० आशौचं [illegible] नस्यात्।एतानिसर्वाशौचेषुनाशुद्धानीति।अत्रषडपिसन्नमं राम०
तपराभिनाशौचमित्यनेनप्रत्येकयोज्यानि।स्वामिनोऽनुमननात्स्वाम्यनुज्ञायाःमानिशकादीनि १३

यमाशौचरहितःपुमानन्येभ्योदद्यात्स्वयंचाद्यात्।अदभक्षणेधातोर्लिङ्रूपं।एवंकृतेदोषोनेत्यभिसं
धिः।तथापणीतमपणीतंवापिसर्वंशुचिःस्यादितिस्पष्टं।तथाचोक्तंमरीचिना।लवणेमधुमांसेचपुष्प
मूलफलेषुच।शाककाष्ठतृणेष्वप्सुसर्पिर्दधिपयःसुच।तिलौषधाजिनेचैवपक्वापक्वेस्वयंग्रहः।
पण्यापणेषुसर्वेषुनाशौचंमृतसूतकेइति।।अत्रपक्वंभक्ष्यजातंअपक्वंतंदुलादिः।एतत्पक्वाप
क्वाप्यनुज्ञातेअन्नसत्रप्रवृत्तविषयं।।अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं।भुक्त्वापक्वान्नमेते
षांत्रिरात्रंतुपयःपिबेदित्यंगिरोवचनात्।। ।।२०।। ।।अथेदानीमग्नेरुपादेयत्वानुपादेयत्वमेकविंश
तितमेनवृत्तेनाह।। ।।जातारण्यग्निनावाप्यपरिणयनविधेर्दे ध्विराधानकालात्स्वैरंगार्ध्यंतुविध्या
हितहुतवहनेलौकिकेनाप्यभावे।।चांडालाग्निश्चिताग्निःपतितहुतभुजंसूतिकामेध्यवह्नीजह्याद्
ग्राह्यस्तेनैंधनदहनघृताद्येनदाहोप्यदाह्यः।। ।।२१।। ।।अर्वाक्परिणयनविधेर्विवाहात्प्राक्जातारण्य
ग्निदग्धिःदाहोविहितः।।जातारणिर्जातकर्मसमयेयोअरणिस्तन्मथनेनोत्पन्नैतियावत्।।विवाहाद्
ने

Indira Gandhi National
Centre for the Arts

६

र्ध्वमाधानकालादर्वाग्दक्षिणाग्नेर्वा स्वेनाग्निना दाहः। ऊर्ध्वं त्वाधानानंतरं विध्याहितहुतवहेनैः विधिना
१४ आहिताः संगृहीताः विधियुक्ताधानाख्यसंस्कारसंस्कृता ये दक्षिणाग्न्यादयस्त्रयस्तैर्दाहः। एतेषां जा
तानामपि अग्न्यादीनामभावे लौकिकाग्निनाऽसंस्कृतेनाग्निना दाह इत्यन्वयः। तदुक्तं वृद्धयाज्ञवल्क्येन।
आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः। अनाहिताग्निरेकेन लौकिकेनापरो जन इति॥ क्व
चिल्लौकिकाग्न्यपवादमाह॥ चांडालाग्निमित्यादिना। चांडालादीनामग्न्यादीन्वर्जयेत् यतो जत्यात्रोप
देयात्॥ तथा च देवलः॥ चांडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न
शिष्टग्रहणोचित इति॥ इंधनानामप्यपवादमाह॥ शूद्राहृतेनेंधनेत्यादि। इंधनं काष्ठं दहनोऽग्निः
घृतमाज्यं अन्यादिशब्देन पयः प्रभृतिपदुपयुज्यते तत्संग्रहः। शूद्राहृतेनेंधनादिना ये दाहः सदा
दा॰ दी॰ होऽपदाह इति योजना। सदाहो न भवति कृतोऽप्यकृत एवेत्यर्थः। तथा च यमः। यस्यानयति शूद्रोऽग्निं राम॰
तृणकाष्ठहवींषि च। प्रेतत्वं च सदा तस्य स चाधर्मेण लिप्यत इति॥ ॥२१॥ ॥अथ द्विजोऽन्वष्टेन १४

=१.ती=१

दहनेदिति कर्तव्यतामधिकारिणश्चाह॥ ॥सर्वं तु स्त्रीविदध्यादुपनयनविधेः प्राक् परं तु स्वशाखा
योक्तैस्तद्विधानैः सकलशवविधिं ज्येष्ठपुत्रोऽवरो वा॥ पुत्राभावे क्रमेण स्वकुलजजननीवंश्यशिष्य
स्त्विजो वाचार्यो वा यत्र कुर्यात् स्वप्रथमदिनविधिं सोऽपि तत्सूतकांतं॥ ॥२२॥ ॥एतत्सर्वं दाहादिसंबंधि
र्त्विजो वाचार्यो वा यत्र कुर्यात्स्वप्रथमदिनविधिं सोपि तत्सूतकांतं॥ ॥२२॥ ॥एतत्सर्वं दाहादिसंबंधि
पदार्थादि उपनयनविधेः प्राक् तूष्णीममंत्रकमेव विदध्यात्। तथा चोक्तं लोगाक्षिणा। तूष्णीमेवो
दकं दद्यात्तूष्णीं संस्कारमेव च इति। परं तु उपनयनानंतरं स्वशाखायां योक्तैस्तद्विधानैः स्वगृह्यो
क्तमार्गेण विदध्यादिति स्पष्टमितरत्। अत्र चोपेतश्चेदाहिताग्न्यावृतार्थवदिति याज्ञवल्क्यवचनं
मूलमनुसंधेयं॥ इदानीमधिकारिणं निरूपयति॥ सकलं सर्वं शवविधिं प्रथमदिनमारभ्य दशा
हांतं स्वगृह्योक्तक्रमं ज्येष्ठपुत्रो वरो वा कनिष्ठो वा विदध्यादिति संबंधः॥ पुत्राभावे कर्तृविशेषं दर्श
यति॥ पुत्राभावे क्रमेणेति। पुत्राणामभावे क्रमेण स्वकुलजः सपिंडः सोदको वा तदभावे [illegible]
~~दर्शयति॥ पुत्राभावे क्रमेणेति। पुत्राणामभावे क्रमेण~~ जननीवंश्यजः तदभावे शिष्यस्तदभावे ऋ

Indira Gandhi National
Centre for the Arts

त्विकृतदभावेआचार्योवाविदध्यादित्यन्वयः।सकलेत्यनेनसकलंश्राद्धविधिंप्रथमदिनमारभ्यदशाहां
१५ तंकर्तृभेदेनकार्यइतिसूचितं।तथाचाहलघुपरिशिष्टे।असगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान्।प्रथ
मेहनियोदद्यात्सदशाहंसमापयेदिति।अत्रगौतमस्मृतिः।पुत्राभावेसपिंडाम्चशिष्यस्त्वाचार्यत्रेलि
जइति॥इदानींदेशनियममाह॥यत्रेति।यत्रयस्मिन्देशेप्रथमदिवसविधिंकुर्यात्तैर्पिसएवदेशः।
ततस्तत्कालेदशाहपर्यंतंयत्रप्रथमदिनकृत्यंकृतंतस्मिन्नेवदेशेसर्वंदशाहपर्यंतकर्मकर्त्तव्यमि
त्याभिसंधिः।अत्रदेशनियमेशिष्टाचारोमूलमनुसंधेयं॥ ॥२२॥ ॥इदानींकेस्यकोविधिःकर्त्तव्य
इत्यपेक्षायांत्रयोविंशतिमवतारेणाह॥ ॥आनाम्नःखातमात्रंनजलहुतवहौनामवर्षत्रयांतःकामंचो
र्ध्वंतुनित्यौभवतउपरतेचौलकेचौलयुक्ते॥नित्यौकालाविशेषात्पितृमुखराःस्थापयित्वाम्बरस्थंगां
धाधेःश्मोभयित्वामृतमथखननेयोज्यमान्यैर्विलिप्य॥२३॥ ॥आनाम्नोनामकरणात्प्रागुपरतेखा एम०
तमात्रंखननमेव।मात्रशब्दार्थस्पष्टयति॥नजलहुतवहाविति स्पष्टं॥नामवर्षत्रयांतःनामनामक १५

रणंततआरभ्यवर्षत्रयांतःवर्षत्रयमध्येउपरतेजलहुतवहौकामंस्वेच्छयानुष्ठेयौननियतौऊर्ध्वं
वर्षत्रयादनंतरंअकृतचूडेउपरतेनित्यौभवतः॥कृतचूडेविशेषमाह॥अपिचौलयुक्ते नित्यौकाला
विशेषाद्वर्षत्रयात्प्रागपिकृतचौलस्यनित्यावित्यर्थः॥खननविधिमाह॥अथेति।पितृमुखराःपि
तृमुख्याःखननयोग्यंप्रेतंस्थापयित्वाऽनंतरंअंबरस्थंगांधाधेःश्मोभयित्वाऽन्यैर्विलिप्यनिखनेयुरि
तिशेषः॥अत्रचाऊनद्विवर्षेनिखनेन्नकुर्यादुदकंततइतियाज्ञवल्क्यवचनं॥तथा।ऊनद्विवार्षिकं
प्रेतंनिदध्युर्बांधवाबहिः।अलंकृत्यशुचौभूमावस्थिसंचयनादृते।नास्यकार्योऽग्निसंस्कारोनापिका
र्योदकक्रिया।आरण्यकाष्ठवत्त्यक्त्वाक्षिपेयुस्त्र्यहमेवतुइतिमनुवचनं॥तथा॥ऊनद्विवार्षिकेप्रेतेघृता
क्तैनिखनेद्बहिः।यमगाथांगायमानोयमसूक्तमनुस्मरन्इतियमस्मरणंचमूलमित्यनुसंधेयं॥अ॥
॥इदानींशावनेयनेवर्णविशेषेणद्वारविशेषंचतुर्विंशत्तेनाह॥ ॥प्रत्यग्द्वारानगर्याबहिरवनिसु
रंक्षत्रियंतूत्तरेणप्राग्द्वारेणोववैश्यंपितृदिशिशूद्रंफलंनाम्यपितानुयायुः॥वर्षोपःपूर्वमूनद्विगारुप

Indira Gandhi National
Centre for the Arts

ट

रतौनानुयानेनियमः शूद्रैः स्पृष्टोथवोढोयदिभवतिमृतः प्रेतभावान्नमुक्तिः ॥ ॥२४॥ ॥अवनि
१६ सुरंब्राह्मणानगार्याः प्रत्यग्द्वारापश्चिमद्वारेणाबहिर्नयपित्रासर्ववर्णजातयोवैश्यःपूर्वेदक्षपुरस्सरं
अनुयायुरनुगच्छेयुः ॥ अयमनुगमननियमो द्विवर्षाधिकमृतौज्ञेयः ॥ तथाहियाज्ञवल्क्यः ॥ आ
श्मशानादनुव्रज्यइतरोज्ञातिभिःसहेति ॥ क्षत्रियंतूत्तरद्वारेणवैश्यंप्राग्द्वारेणशूद्रंपितृदि
शादक्षिणस्यांदिशियद्द्वारंतेननापित्रासर्ववर्णजातयःवैश्यःपूर्वदक्षपुरःसरमनुयायुरित्यन्वयः
॥तथाचस्मृतिः ॥ दक्षिणेनमृतंशूद्रंपुरद्वारेणनिर्हरेत् । पश्चिमोत्तरपूर्वैस्तुयथासंख्यंद्विजातयइ
ति ॥ इदानींवयोविशेषेमृतस्यानुगमननियमापवादमाह ॥ ऊनद्विशरदुपरितोऽनद्विवार्षिकमृतौ
सत्यामनुयानेनियमोन । तदुपरितावनुगमनकर्त्तव्यताआवश्यकीनभवतीतियावत् । अत्रापिएकी
कायाज्ञवल्क्यस्मृतिरेवमूलं । अथशूद्रस्यस्पर्शनेतत्कृतवहनेदोषमाह ॥ शूद्रैःस्पृष्टोथवोढोय एम०
दिभवतीति । यदिमृतःप्रेतःशूद्रैःस्पृष्टोऽथवाऊढोभवतितदाप्रेतभावान्नमुक्तिः ॥ तथाचमनुः ॥ नवि १६

प्रेस्वेषुतिष्ठत्सुमृतंशूद्रेणहारयेत् । अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषितेति ॥ ॥२४॥ ॥अ
थपंक्तिशाद्दत्तेनोदकदानेविशेषमाह ॥ ॥ओं नामातापित्रोरपिपरमगुरोर्नित्यमंभोथमित्रप्रत्ता
स्वस्रीययाज्यश्वशुरगुरुसुहृद्घानकानांयथेच्छं ॥ नव्रात्यब्रह्मचारिव्रतयतिपतितक्लीबपाषंडि
चौरादघ्ययेत्त्वत्रापिदानलजलकल्पनानर्हकास्तेतुसूक्ष्माः ॥ ॥२५॥ ॥ज्ञातयःसपिंडाःसोदकाश्च
।मातापितरौप्रसिद्धौपरमगुरुराचार्योमातामह इत्येतेषामंभउदकदानंनित्यं । अयमर्थः ॥ सपिंडा
नोऽआसप्तमपुरुषावधिकायांसपिंडोद्देशेनततःसोदकानांसप्तमपुरुषमारभ्यपुनःसप्तमपुरुषा
वधिकानांसोदकोद्देशेनपुत्रस्यमातापित्रोरुद्देशेनब्रह्मचारिणाआचार्योद्देशेनपदुदकदानं
तन्नित्यमिति । यथाहयाज्ञवल्क्यः ॥ सप्तमाद्दशमाद्वापिज्ञातयोभ्युपयन्त्यपइति ॥ तथा ॥ एवंमा
तामहाचार्यप्रेतानामुदकक्रियेति ॥ इतरत्रनियमाभावमाह ॥ अथमित्रेतिमित्रंसखा ॥ प्रत्ताप
।रिणीतादुहितास्वसाच ॥ स्वस्रीयादयःप्रसिद्धाः ॥ एतेषामंभोदानंयथेच्छयाभवतिननियतमिति

Indira Gandhi National
Centre for the Arts

माष:। अत्रापि याज्ञवल्क्यः। कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजामिति केषांचिदुदकदानेऽक
१७ र्तव्यतापवादमाह। न ब्रह्मचारिणा। व्रात्यादयः प्रसिद्धाः। ते प्रेतायोदकं न द[illegible]घ इत्यन्वयः। ते के
इत्यपेक्षायामाह॥ पेत्वत्रेति। पेत्वत्र पिंडानल जलक्रथनानर्हकाः। पिंडाद्ययोग्या इत्युदकादि
नर्दघः। के ते इत्यपेक्षायामाह॥ ते पुनः स्तकाः स्पष्टाः एवेति॥ तथा च स्मृतिः। न ब्रह्मचारिणः कुर्यु
रुदकं पतितास्तथा॥ तथा च वृद्धमनुरपि। क्लीबाद्यानोदकं दद्युस्तेनाव्रात्या विधर्मिणः। भर्तृगर्भ
द्रुहश्चैव सुराप्यश्चैव योषित इति॥ ॥२५॥ ॥अथ षड्विंशेन संस्कारानंतरं यत्कार्यं तदाह॥ ॥सं
स्कृत्यानीक्षमाणाः सकलकुलभुवो बालपूर्वं व्रजिला नादेयं वृद्धपूर्वं पयसि सवसना एकवारं निम
ज्यापाणौ त्रिः सकृद्वा प्रतिदिनमुदकं ब्राह्मणो दक्षिणास्याः क्षत्रो वोदङ्मुखो वैश्यस्तथा वा तिरश्चीनः १७
प्राङ्मुखा वै ददीरन्॥ ॥२६॥ ॥ते सकलकुलभुवः समस्तजातयो बालपूर्वं बालप्रमुखाः प्रेतं संस्कृ रामः
त्य दाहयित्वा संस्कारस्थलीमनीक्षमाणाः नादे[illegible]यपयसि व्रजित्वा वृद्धपूर्वं वृद्धपुरःसरं सवसनाः स

वस्त्राः एकवारं निमज्य पाणौ त्रिः त्रिवारं सकृदेकवारं वा प्रतिदिनं प्रत्यहं दशाहं दिनं यावदुदकं ददी
रन्निति संबंधः॥ उदकदाने वर्णभेदेन दिग्विशेषमाह। विप्रादयः पितुं तान्वर्णान्त्रिस्त्रीन्नष्टि॥ ब्राह्मणादीन्
रन्निति संबंधः॥ उदकदाने वर्णभेदेन दिग्विशेषं विशदयितुं तान्वर्णान्निर्दिशति॥ ब्राह्मणा इत्यादि
नाब्राह्मणो भवति दक्षिणास्यो दक्षिणामुखः क्षत्रियो भवति उदङ्मुखः। विट्‌ त्रिशतुर्भवति
प्राङ्मुखो वा इति। अथ यथाविभागं प्रागुक्ताः समस्तजातयः सकला उत्तराभिमुखाः संतः एवया
वद्दशाहं जलं ददीरन्निति तात्पर्यं शरीरमग्नौ संयोज्यानवेक्षमाणाः अपोऽभ्युपयंतीति त्राता
पस्मृतिः। प्रेतस्य बांधवा यथावृद्धमुदकमवतीर्याभ्युत्पनो दूर्ध्वं पेयुरुदकांते प्रसिंचेयुः॥ अप
सव्यं यज्ञोपवीतं तथा सत्सोऽदक्षिणाभिमुखा ब्राह्मणस्योदङ्मुखा प्राङ्मुखाः क्षत्रियवैश्ययो
[illegible] तिप्रचेतसो वचनं। तथा। सकृत्प्रसिंचेत्सुदकं नामगोत्रेण वाग्यत इति याज्ञवल्क्यः। त्रिःप्रसेकं कु ५
र्युः प्रेतस्त्वप्यत्विति प्रचेतोमूलवचनं॥ ॥२७॥ ॥अथ सप्तविंशेन वृत्तेनोदकदानानंतरं यत्कार्यं त
दाह॥ ॥स्नापुर्भूमौ पित्वं त्रिनिशामनशनाज्ञात यो ऽहनि श्रावाक्रीतोत्पन्नान्नान्वा मिषलवणा

Indira Gandhi National
Centre for the Arts

यः क्षारमन्नं त्यजेयुः ॥ स्त्रीसंगमं गाला निश्वसनहसनमुद्दोहनोच्चासनानि ताराणिस्तीर्णाः क्षितौ ते
१८ पृथगिति निपताः संविश्योर्पूर्निरुायाः ॥ ॥२७॥ ॥ज्ञातयस्तत्रपयसि मग्ना एवं त्वा उदकदानानंतरं पुनः
स्नायुः स्नानं कुर्युः ॥ ततस्ते प्रेतकर्मणोऽनंतरमाह ॥ त्रिदिनमन्नाना संतः अहर्निशमहोरात्रं वा अत्र
नन्नाना क्रीतोत्पन्नान्नानावासंतः क्रीतेन कर्मणा प्राप्तमुत्पन्नमयाचितप्राप्तं यदन्नं तदन्नाना स्तद्
क्षकाम वेयुः । अथ भोजनेनियममाह ॥ तत्रामिषलवणपयः क्षारान्नं त्यजेयुः ॥ अथ च स्त्रीसं
गमं माला निश्वसनहसनमुद्दोहनोच्चासनानि त्यजेयुरिति पूर्वेण संबंधः ॥ अथ निद्रां कृत्यमाह
॥ ताणिस्तीर्णाः क्षितौ ते इति । तृणानि निर्मितं यदास्तरणं तत्रागतेनास्तीर्णाछादिता या भूमिः ॥ तत्रानि
निपताः ब्रह्मचर्यादि नियमयुक्ताः पृथक् शय्यां संविशेयुरिति । स्वप्नमन्यत ॥ अत्र क्रीतलब्धा
न्नानामूनोऽस्वपेयुस्ते पृथक् पृथक् इति याज्ञवल्क्यवचनं ॥ दहाग्नि जित्वाधः प्रस्तरे अहमनं अंत राम०
आसीरन्निति वसिष्ठवचनं । क्रीतोत्पन्नेन वा वर्त्तेरन्निति याज्ञवल्क्यवचनं । अक्षारलवणान्नाः स्यु १८

६

स्त्रिमज्जेयुश्चतेत्र्यहं । मांसाशनमनाश्नीयुः शयीरन् पृथक् क्षिताविति मनुवचनं । अधः शायिनोऽत्र
ह्मचारिणश्च ब्रह्मवर्चसमिति । गौतमवचनं मूलमित्यनुसंधेयं ॥ ॥२७॥ । अथाशौचविशेषेण क्रियाह संबं
धिनं विधिमाह ॥ ॥ संस्कर्ता दर्भपुंजे समधुदहनतः प्रत्यहं पिंडमेकं भूमावेवावपेत प्रथमदिनचरूद्व्यं म
वा परिष्ठात ॥ दोहा हादेवगणं पंचपन दिनमिदं चादितो द्वौ चतुर्णामेकस्मिन्नसमेवाह निनवमदिने वा
नुपेतेतु नैतत ॥ ॥२८॥ ॥ संस्कर्ता दाहकर्त्ता दहनानंतरं प्रत्यहं प्रतिदिनं दर्भपुंजे । भूमावेवास्तृते दर्भपुं
जे एकैकं पिंडं समधु यथा भवति तथा शालिसक्तु शाकादिसंस्कृतिप्रतिपादितपिंडप्रकृतिभूतद्रव्यात्पतमद्
व्यनिर्मितं प्रेतोद्देशेन आवपेद्यावद्दशाहमेकैकमेव पिंडं दद्यादि [illegible] तिभावः । तथा च स्मृतिः । नवभिर्दि
वसैर्दद्यान्नव पिंडान् समाहितः । दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेदिति । अत्र भूमावित्यनेन पाषाण
व्यावृत्तिः सूचिता । तदुक्तं शंखेन ॥ भूमौ माल्यं पिंडं पानीयमनुलेपनानि दद्युरिति ॥ पिंडदाने द्रव्यनियमम
ह ॥ प्रथममिति । प्रथमदिवसे पक्वचरुद्रव्यं तदेवोपरि दद्यात् यावद्दशाहे कर्त्तव्यं न द्रव्यांतरमुपादेयमिति यावत् ॥

Indira Gandhi National
Centre for the Arts

११

तदुक्तं शुनःपुच्छमुनिना। शालिना सक्तुभिर्वापि त्र्यात्के वाप्यथ निर्वपेत्। प्रथमेऽहनि यद्दत्तं तदेव स्यादृताद्दिकमि

१९ ति॥ अथ संचयनकालमाह॥ दशाहादर्वेवेति। चयनं दिनं दशाहादर्वाक्। येन मरणादिनादिति॥ अस्थिसंच

यनं दशाहान्तर्गतं हस्तमयथाविधीयते गिरोवचनात्। इदं संचयनं दशाहदिनतोयानि चत्वारि दिनानि तेषां मध्ये

एकस्मिन्दिने दशाहतः सप्तमेऽहनि नवमदिने वा कार्यमिति शेषः। तथा च संवर्त्तः। प्रथमेऽह्नि तृतीये वा सप्तमे

नवमे तथा॥ अस्थिसंचयनं कार्यं दिवा तद्गोत्रजैः सहेति। तथा च स्मृत्यन्तरेऽपि। द्वितीये त्वस्थिसंचय इति।

तथा विष्णुरपि। चतुर्थदिवसेऽस्थिसंचयनं कुर्यात् तेषां गंगाम्भसि प्रक्षेप इति॥ ॥२८॥ ॥अथैकोनत्रिंशे

नक्षत्रे वपनादिविधिमाह॥ ॥वर्षस्य सप्तऊते तु परिवपनं न खच्छेदनं सप्ततकान्ते मध्ये वाके चिदूचुः पितृप

रमगुरुष्वेव वपादि नित्यं॥ अत्र स्मार्त्तैः शुभार्थं गणितम [illegible] भणितं च स्वपरस्य विदितात्कृत्वा दानं च

दद्यात् शुभमथ यदि वेद भूसुरेभ्यः शुभार्थी॥२९॥ ॥वर्षस्य परिवृद्धे संस्थिते सतितु पुनः सप्तकान्ते दर्शमेऽहनि

उपरि वपनं न खच्छेदनं कुर्यात् स कुर्यादिति शेषः। उपरिवपनं मूर्द्धनि केशानां श्मश्रुवपनं। अथ के चिन्म

नक्षत्राणां मतमनुसृत्याह। मध्ये वेत्यादिना। वा इति। अथवा के चिन्मध्ये त्रयोदशमध्ये द्वितीये पंचमे सप्तमे वा

दिने कर्त्तव्यमित्यूचुरिति। तथा च देवलः। दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्याज्यानि वासांसि

केशश्मश्रुनखानि च इति। तथा च स्मृत्यन्तरे। द्वितीयेऽहनि कर्त्तव्यं क्षुरकर्म प्रयत्नतः। तृतीये पंचमे वापि स

प्तमे वा प्रथानत इति॥ वपने निमित्तविशेषेणावश्यकतामाह॥ पितृपरमगुरुष्वेव वपादि नित्यमिति। ए

ष्वेव संस्थितेषु वपादि नित्यमावश्यकं पुत्रादीनां नेतरत्रेति भावः। तदुक्तं। गंगायां भास्करक्षेत्रे मातापित्रो

र्गुरोर्मृते। आधानकाले सोमे च वपनं सप्तसु स्मृतमितीति॥ सृतकान्ते एतत्कर्त्तव्यं तदाह॥ अत्रेति। अत्र

यस्मान्नैकर्म कर्त्तव्यतया मयोक्तं यच्चनोक्तं तत्सर्वं स्वपरस्योक्तं विदितानुष्ठाय पश्चादशुभमथ यदि वेद

शुभनाशनाय शुभार्थं शुभं प्राप्तये च भूसुरेभ्यो ब्राह्मणेभ्यो दानं दद्यात् स्पष्टमेतत्॥ ॥२९॥ ॥इदानीं श्म

शानाद्गतानां प्रेतगृहप्रवेशनविधिं त्रिंशे नक्षत्रेनाह॥ ॥दत्वा पिंडं स पिंडाः परशवदहनं स्नापका ध्व

व्रजित्वा तद्गृहद्वारि चाश्मप्रशामितमनसो निंबपत्रं विदश्य॥ आचम्याग्न्यंबुदूर्वांकुरवृषभान स्पृष्टाश्मा

Indira Gandhi National
Centre for the Arts

१९ मपंचस्पृष्ट्वा सिद्धार्थतैलाभ्यक्तद्वारप्रविष्टस्य सर्वे विशुध्युः॥ ॥३०॥ ॥सपिंडाः परशावं वहन्तः स्नापका
श्चत्राचायपिंडदस्नातृदेशमवर्जिताः अस्पृष्टाः प्रशमितमनसोऽवहिताः संततस्तंनंतरं निंबपत्रं विदश्य
पश्चादाचम्यानंतरं अग्न्यंबुदूर्वांकुरवृषभानस्पृष्ट्वा गोमयं च सिद्धार्थतैलानि च स्पृष्ट्वा दृष्टप्रविष्टं
स्पृश्य सर्वे गृहं प्रविशेयुरिति संबंधः॥ तथा च स्मृतिः॥ इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः॥ विद
श्य निंबपत्राणि नियता द्वारि वेश्मनः॥ आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान्॥ प्रविशेयुः समाल
भ्य कृत्वाश्मनि पदं शनैरिति॥ ॥३०॥ ॥इति श्रीमिताक्षरायामाशौचप्रकरणादुद्धृत्य कृतायां लिं
गश्लोक्याः श्रीमद्रुद्राचार्यकृतं भाष्यं समाप्तमिति भद्रम्॥ ॥श्रीराः शंहरिरूपादिति॥ ॥शाके व्योम
रसांगभूपरिमिते मासेऽधिके चाश्विने पक्षे शुक्लेतरे शिवाधिपतिथौ भूमीसुते वासरे॥ आशौचादिवि
चारसारचतुरं भाष्यं वरं मानस्यकं पद्यात्मलिखितं मुदे नु भवतां छीबालकृष्णेन तु॥ पुस्तकलिखन श्रम०
परिश्रमवेत्ता विद्वज्जनो नान्यः॥ सागरलंघनखेदं हनूमानेकः परं वेद॥ १॥ ॥तथा चापस्तंबः॥ अस्पृश्यस्पर्शी २०

नेवांते च अश्रुपाते क्षुरे भगे॥ स्नानं नैमित्तिकं प्रोक्तं दैवपित्र्यविशेषतः॥ अत्र जलाशयमज्जनासंभवे उ
ष्णोदकेनाप्येतत्स्नानं कर्तव्यं॥ तथा च शंखः॥ नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं॥ तीर्थाभावेपि
कर्तव्यमुष्णोदकपरोदकैः॥ इति॥ यदा रोगवशादुष्णोदकस्नानशक्तिरपि भवति न। तदा शुद्धिप्रका
रमाह॥ यमः॥ आतुरस्नानसंप्राप्ते दशकृत्वो ह्यनातुरः॥ स्नात्वा स्नात्वा स्पृशेदेनं ततः शुद्ध्येत्स आ
तुर इति॥ ॥ ॥संवत् १८५५ इदं पुस्तकं लिख्य चरदेवारामजरामचंद्रदेवस्य॥ ॥छ॥
लोकपार्थे लिखितं॥ निर्णयसिंधौ सूतीपरिच्छेदे॥ देवलः॥ दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्॥
पाउयानि वासो॥ सि के श श्म श्रु नखानि च॥ अपरार्के हारीतः नवमे वास सां सांगो नखरोमां
.ते मे। नवेव व्यासः॥ आशौचांत्यदिने क्षौर जननीं च गुरौ मृते॥ एतत्रिता त्यब्दयसा मिलप
स्तंबः। अनुभा त्रिनाच पार वपन मिति। अनुभाविनः कानिष्ठाः॥ इति विज्ञानेश्वर र ए
दयः॥ आशौचमनुभवतां पुंसां सर्वाशौचे मुंडनं॥ मा मा मानुरपते प्रि अन्मनी २१
कुर्मन्मतसूत्रके प नव वी श्रणो ष्ट॥ पं मोक्ष इति॥
चोडव

Indira Gandhi National Centre for the Arts